# संस्कृत-वार्ता:

**दिनाङ्क :- 27.09.2024** **सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

● जम्मूकश्मीरे विधानसभा-निर्वाचनस्य तृतीयाय अन्तिमाय च हरियाणायां एकस्मै चरणाय प्रचाराभियानं सजवं प्रवर्धते।

● अद्य विश्वपर्यटनदिवस: समाचर्यते। अत्रावसरे उपराष्ट्रपतिः जगदीप-धनखडः अकथयत् यत्, पर्यटनं मानवतायाः बन्धनं कल्पयति।

● भारत-उज्बेकिस्तान-देशाभ्याम् अद्य ताशकंदे द्विपक्षीय-निवेशसन्धौ हस्ताक्षरं विहितम् येन हि उभयो: देशयो: निवेशकेभ्य: सुरक्षा सुनिश्चिता जाता।

● शिगेरू-इशिबा इत्येष: जापानदेशस्य नवीन-प्रधानमन्त्री-पदाय सुसन्नद्धो वर्तते।

● क्रिकेट-प्रतिस्पर्धायाम् कानपुरे जातायां द्वितीयायां अन्तिमायां च क्रिकेट-निकषस्पर्धायां भारतीयदलं विरूध्य बांग्लादेशदलेन प्रथमे द्वन्द्वे त्रयाणां स्तोभानां हानिपुरस्सरं सप्ताधिकैकशतं धावनाङ्का: समर्जिता:।

## अथ वार्ता: विस्तरेण

**जम्मूकश्मीरनिर्वाचनम्**

जम्मूकश्मीरे विधानसभा-निर्वाचनस्य तृतीयाय अन्तिमाय च चरणाय प्रचाराभियानं सजवं प्रवर्धते। जम्मूकश्मीरे एतस्मिन् अन्तिमचरणे चत्वारिंशत्-विधानसभा-क्षेत्रेभ्य: मङ्गलवासरे मतदानं भविष्यति। मतदातॄन् आक्रष्टुं विभिन्नानां राजनीतिक-दलानां नेतार: जनसभा: पथप्रदर्शन्य: च कुर्वन्ति। भाजपेतिदलस्य वरिष्ठनेता प्रधानमन्त्री नरेन्द्रमोदी श्व: जम्मूनगरे एकं जनसमागमं सम्बोधयिष्यति। कांग्रेसदलनेत्री प्रियङ्कागांधी श्व: केन्द्रशासिते एतस्मिन् प्रदेशे जनसभा: सम्बोधयिष्यति। तत्रैव हरियाणायां नवति: विधानसभासनेभ्य: मतदानं अक्टूबरमासस्य पञ्चमे दिनाङ्के सुनिश्चितमस्ति। राज्येऽस्मिन् अपि प्रचाराभियानं तीव्रं जातम्। केन्द्रीय-गृहमन्त्री अमितशाह: अद्य रेवाड़ी जनपदे एकां जनसभां सम्बोधितवान्।

**विश्वपर्यटनदिवसः**

अद्य विश्वपर्यटनदिवस: समाचर्यते, जनानां मध्ये पारस्परिकसमन्वये अर्थव्यवस्थायाः प्रबलीकरणे पर्यटनस्य भूमिकां प्रख्यापयितुं प्रतिवर्षं सितम्बरमासस्य सप्तविंशे दिनाङ्के आमान्यते। अस्य वर्षस्य विषयो वर्तते - पर्यटनम् शांतिश्च। अद्य नवदिल्ल्यां अस्मिन् अवसरे आयोजिते एकस्मिन् कार्यक्रमे सम्बोधयन् उपराष्ट्रपतिः जगदीप- धनखडः अकथयत् यत्, पर्यटनं

मानवतायाः बन्धनं कल्पयति, यत् अधुना अत्यन्तं आवश्यकं, शान्त्यर्थं च योगदानं करोति इति। असौ प्रावोचत् यत् वर्तमानकालिके सम्पूर्णे विश्वे शान्तेः उत्कण्ठा अस्ति इति। पर्यटनमन्त्री गजेन्द्रसिंह- शेखावत: स्वसम्भाषणे अघोषयत् यत् तस्य मन्त्रालयः शीघ्रमेव देशस्य पर्यटनस्य सर्वांगीणविकासाय समर्पितां प्रमुखसूचीम् प्रकाशयिष्यति इति। जनसमूहं सम्बोधयन् नागरिक-विमानयान-मन्त्री के. राममोहन-नायडुः अवदत् यत् विमानयान-पर्यावरणव्यवस्था देशस्य आतिथ्यस्य प्रतिबिम्बरूपेण कार्यं करोति इति। अस्मिन् अवसरे धनखड-वर्यः पर्यटनमन्त्रालयस्य विभिन्नान् उपक्रमान् प्रारब्धवान् विश्वपर्यटनदिने उत्तरप्रदेशे अनेके कार्यक्रमाः आयोजिताः सन्ति।

**आन्ध्रप्रदेशप्रसादम्**

आन्ध्रप्रदेश-प्रशासनेन तिरुमला-मन्दिरस्य 'लड्डु-प्रसादम्' इत्यस्मिन् मोदके प्रयुक्तस्य घृतस्य अपमिश्रणं अन्वेष्टुं ऐ. पी. एस्. अधिकारिणः सर्व-श्रेष्ठस्य नेतृत्वे नवसदस्यीय-विशेष-अन्वेषण-दलं निरमात्।

**केरल-वानरजनितसङ्क्रमणम्**

वानरजनितसङ्क्रमणात् केरलराज्ये अष्टत्रिंशद्वर्षीय: एक: अन्य: अपि युवक: संक्रमितो जात:। सुत्रानुसारि असौ एकस्मिन् चिकित्सालये उपचाराधीनो वर्तते। अत्रावधौ राज्यस्वास्थ्य-मन्त्री वीना जॉर्ज: स्थितिं समीक्षितुं तिरुवनन्तपुरे एकं उच्चस्तरीयोपवशेनं समाहूतवती। स्वास्थ्यविभागेन संक्रमितजनानां सम्पर्कसूची निर्मिता अपि च निवारकोपाया: प्रबलीकृता: संक्रमणमिदं नैव प्रसारितम इति मनसिनिधाय जना: संचेतिता भवेयुरिति। प्रशासनेन राज्यस्य सर्वेषु चतुर्दशजनपदेशेषु पृथगावाससौविध्यानि संस्थापितानि। अवधेयं वर्तते यत् अस्य मासस्य अष्टादश दिनाङ्के मलप्पुरमजनपदस्य मंजेरी-चिकित्सकीय-महाविद्यालये एकस्मिन् जने अस्य संक्रमणस्य पुष्टि: जाता। विश्वस्वास्थ्य-सङ्घटनेन वानरजनित-सङ्क्रमणं एम्.पॉक्स इति अन्ताराष्ट्रिय-चिन्ताया: सार्वजनिक-स्वास्थ्य-आपात्काल: घोषित।

**अर्थव्यवस्था-प्रतिवेदनं**

वित्तमन्त्रालयेन ह्य: प्रकाशितायां अगस्तमासाय स्वीयायां मासिक-आर्थिक-समीक्षायां निगदितं यत् राष्ट्रं प्रवर्तमाने वित्तीय-वर्षे षड्-दशमलव पञ्चप्रतिशतत: सप्तप्रतिशतं यावत् सकल-गृहोत्पादस्य वृद्धिं प्राप्तुं सज्जमस्ति। प्रतिवेदने लिखितं यत् प्रथमे त्रैमासिके आर्थिकगति: समेधमाना आसीत् या सर्वेषु कृष्येतर-क्षेत्रेषु पञ्चप्रतिशतं यावत् वृद्धिसमर्थनं अमिलत्।

**राष्ट्रियान्वेषणाभिकरणम्**

राष्ट्रियान्वेषणाभिकरणेन अस्मिन् वर्षे जूनमासे जाते एकस्मिन् लोकयाने आतङ्कीयाक्रमणस्य अन्वेषणार्थम् अद्य जम्मू सम्भागस्य राजौरी-रियासी-जनपदानाम् अनेकेषु क्षेत्रेषु अन्वेषणकार्यं सम्पाद्यते। ध्यातव्यमस्ति यत् लोकयानमिदं रियासी जनपदस्य शिव-खाड़ी-मन्दिरात् प्रत्यागतान् तीर्थयात्रिण: नयति स्म तदा आतङ्कवादिन: प्रहारं कृतवन्त:।

**बिहारे-अतिवृष्टि:**

उत्तर प्रदेश-बिहार-महाराष्ट्रप्रदेशेषु अतिवृष्ट्या सामान्यजनजीवनम् अस्तव्यस्तं समजायत। उत्तरप्रदेशे वृष्टिसम्बद्धघटनासु न्यूनातिन्यूनं पञ्चजना: मृत्युमुपगता:। मुख्यमन्त्रिणा योगी-आदित्यनाथेन अद्य प्रात: वरिष्ठाधिकारिणां समुपवेशनं विहितम्। अवसरेऽस्मिन् तेन वृष्टिं निध्याय सतर्कतां संस्थापयितुम् अभिहितम्। राज्यस्य केषुचिज्जनपदेषु गतदिनादेव महनीयवर्षा जायमाना आसीत्।

**जापान-नूतनप्रधानमन्त्री**

शिगेरू-इशिबा इत्येष: अद्य लिबरल-डेमोक्रेटिक-पार्टीति दलस्य नेतृत्वनिर्वाचने विजयमवाप्य प्रधानमन्त्रीपदाय सुसन्नद्धो वर्तते। पूर्वरक्षामन्त्रिणा राष्ट्रवादी-साने-ताकाइचीं विरूध्य पञ्चदशाधिक-द्विशतमतदानै: विजयं संप्राप्तम्। सप्तषष्टि: वर्षीय: इशिबा इत्येष: आगामीमासस्य संसद: उपवेशनानन्तरं अग्रिम प्रधानमन्त्रित्वेन पदभारं ग्रहीष्यति।

**भारत-उज्बेकिस्तान**

भारत-उज्बेकिस्तान-देशाभ्याम् अद्य ताशकंदे द्विपक्षीय-निवेशसन्धौ बी आई टी इत्यस्योपरि हस्ताक्षरं विहितम्। सन्धिपत्रेऽस्मिन् वित्तमन्त्री निर्मला-सीतारमण इत्यनया सहैव उज्बेकिस्तानस्य उपप्रधानमन्त्रिणा हस्ताक्षरं विहितम्। भारत-उज्बेकिस्तानयो: मध्ये बी आई टी सन्धिपत्रं भारते उज्बेकिस्तानस्य निवेशकेभ्य: उज्बेकिस्ताने भारतस्य निवेशकेभ्य: उचित सुरक्षाया: आश्वासनं प्रददाति। अयं सन्धि: निवेशकेषु विश्वासं संवर्धयिष्यति। अनेन द्विपक्षीय-निवेशे वृद्धे: मार्ग: प्रशस्तीभविष्यति।

**लेबनान-हिंसा**

इज़राइलदेशेन हिजबुल्लाहसमूहं विरुध्य स्वसैन्याभियानं सजवीकृतम्। लेबनानदेशस्य स्वास्थ्यमन्त्रालयस्य प्रतिवेदनानुसारं एतावता इज़राइल-आक्रमणे सप्तशतं जना: मृत्युमुपगता:। साम्प्रतं इज़राइलदेशस्य सेना हिजबुल्लाहसमूहस्य सैन्यक्षतानामुपरि वरिष्ठ-सैन्यप्रमुखाणामुपरि च ध्यानं केन्द्रयति। नागरिकाणां बृहत्संख्यायां मृत्युना अन्ताराष्ट्रिय-चिन्ता संवर्धमानास्ति।

**बैडमिण्टनप्रतिस्पर्धा**

मकाऊ-मुक्त-बैडमिण्टन-प्रतिस्पर्धायां ट्रीसा-जॉली गायत्री गोपीचन्द-इत्यनयो: युगलेन ताइवानदेशीये ह्सू-यिन-हुई-वू-लुओ-यू इत्यते पराजित्य उपान्त्यचक्रे समाविष्टम्।

**भारत: बाङ्ग्लादेश-क्रिकेट्**

क्रिकेट-प्रतिस्पर्धायाम् कानपुरे जातायां द्वितीयायां अन्तिमायां च क्रिकेट-निकषस्पर्धायां भारतीयदलं विरूद्ध बांग्लादेशदलेन प्रथमे द्वन्द्वे त्रयाणां स्तोभानां हानिपुरस्सरं सप्ताधिकैकशतं धावनाङ्का: समर्जिता:।

**।। इति वार्ता:।।**